# Uddanda Shastri’s Kokila Sandesha

# કોકિલસન્દેશઃ ઉદ્દણ્ડશાસ્ત્રિવિરચિતઃ

## Document Information

Text title : uddaNDashAstrivirachitaH kokilasandeshaH

File name : kokilasandesha.itx

Category : major_works

Location : doc_z_misc_major_works

Author : UddaNDashAstri

Transliterated by : www.rasalabooks.com Contact Venetia Ansell venetia at rasalabooks.com

Proofread by : www.rasalabooks.com Contact Venetia Ansell venetia at rasalabooks.com

Latest update : July 31, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# કોકિલસન્દેશઃ ઉદ્દણ્ડશાસ્ત્રિવિરચિતઃ

પૂર્વભાગઃ

સૌધે તુઙ્ગે સહ દયિતયા કોઽપિ સઙ્ક્રીડમાનઃ
પ્રાપ સ્વાપં પરમપુરુષઃ શેષભોગે શ્રિયેવ ।
ચિત્રા દૈવી ગતિરિયમસૌ શૈલજામણ્ડિતાયાં
કાઞ્ચ્યાં કમ્પાતટભુવિ તયાનન્વિતો બુધ્યતે સ્મ ॥ ૧॥

ત્વામાનિન્યુઃ સુભગ શયિતં લીલયા નીલકેશ્યો
દ્રષ્ટું દેવં વરુણપુરતઃ સમ્પતન્ત્યો વિમાનૈઃ ।
અત્રામુઞ્ચન્નપિ ભગવતીકિઙ્કરોક્ત્યા સશઙ્કઃ
શુશ્રાવેત્થં સ પુનરવપુસ્સઙ્ગ્રહાં વ્યોમ્નિ વાણીમ્ ॥ ૨॥

ક્ષેત્રે ચાસ્મિન્ સકલવિપદાં ભઞ્જને પઞ્ચ માસા-
નાસીથાશ્ચેત્ પ્રિયજનવિયોગાર્તિરૂર્ધ્વં ન તે સ્યાત્ ।
આકર્ણ્યેમાં પુનરિતિ તથા સૈષ ચક્રે નિવાસં
ક્લેશો ભૂયાનપિ બહુમતઃ શ્લાઘ્યતે ચેદુદર્કઃ ॥ ૩॥

તત્ર દ્વિત્રાન્ પ્રિયસહચરીવિપ્રયોગાતિદીર્ઘાન્
કામાર્તોઽયં શિવશિવ સમુલ્લઙ્ઘ્ય માસાન્ કથઞ્ચિત્ ।
ચૈત્રારમ્ભે સમુદિતમધુશ્રીકટાક્ષાભિરામં
ચૂતાઙ્કૂરાસ્વદનરસિકં કોકિલં સન્દદર્શ ॥ ૪॥

તં કૂજન્તં કલમધુરયા પઞ્ચમસ્વાનભઙ્ગ્યા
કાન્તાલાપસ્મરણવિવશઃ કિઞ્ચિદારાદુપેત્ય ।
દત્વા નેત્રાઞ્જલિપુટભૃતૈરર્ઘ્યમશ્રુપ્રવાહૈ-
ર્જાતાશ્વાસઃ સ્ફુટમિતિ ગિરા શ્રાવ્યયા સન્દિદેશ ॥ ૫॥

અત્રાયાહિ પ્રિયસખ નનુ સ્વાગતં પશ્ય પાર્શ્વે
પ્રત્યગ્રોદ્યન્મધુરસકણસ્વેદિનીં ચૂતવલ્લીમ્ ।
ત્વત્સમ્પર્કં સુભગ નિયતં કાઙ્ક્ષતેઽસૌ વિલોલા

લોલમ્બાક્ષી ચલકિસલયૈરાહ્વયન્તી સરાગા ॥ ૬॥

અન્તસ્તોષં મમ વિતનુષે હન્ત જાને ભવન્તં
સ્કન્ધાવારપ્રથમસુભટં પઞ્ચબાણસ્ય રાજ્ઞઃ ।
કૂજાવ્યાજાદ્ધિતમુપદિશન્ કોકિલાવ્યાજબન્ધો
કાન્તૈઃ સાકં નનુ ઘટયસે કામિનીર્માનભાજઃ ॥ ૭॥

વાચાલં મા પરભૃત કૃથા માં પ્રિયાવિપ્રયુક્તં
પ્રાયઃ પ્રાપ્તં પ્રણયવચનં ત્વાદૃશે માદૃશાનામ્ ।
કિઞ્ચિલ્લીનાં કિસલયપુટે કોકિલામાકુલાત્મા
ત્વં ચાપશ્યન્ બત વિરહિણાં યેન જાનાસિ તાપમ્ ॥ ૮॥

યાવત્કાલં મહિતપતગાધીશ કાર્યે નિયોક્તું
સઙ્કોચં મે વ્રજતિ રસના સન્દિદિક્ષોર્મૃગાક્ષ્યાઃ ।
તાવત્કાલં તવ ચ હૃદયં તાન્તિમેતીતિ શઙ્કે
દીનાપન્નપ્રણયઘટને દીર્ઘસૂત્રેતરસ્ય ॥ ૯॥

સન્દેશં મે નય ખગપતે સાધય ભ્રાતૃકૃત્યં
સન્તાપાર્તાં સુવચન સમાશ્વાસય પ્રેયસીં મે ।
કાન્તોદન્તઃ સુહૃદુપનતો વિપયોગાર્દિતાનાં
પ્રાયઃ સ્ત્રીણાં ભવતિ કિમપિ પ્રાણસન્ધારણાય ॥ ૧૦॥

ગન્તવ્યસ્તે ત્રિદિવવિજયી મઙ્ગલાગ્રેણ દેશઃ
પ્રાપ્તઃ ખ્યાતિં વિહિતતપસઃ પ્રાગ્જયન્તસ્ય નામ્ના ।
પારે ચૂર્ણ્યાઃ પરિસરસમાસીનગોવિન્દવક્ષો-
લક્ષ્મીવીક્ષાવિવલનસુધાશીતલઃ કેરલેષુ ॥ ૧૧॥

તત્ર દ્રક્ષ્યસ્યખિલમહિલામૌલિમાલાયમાનાં
બાલામેનાં નિયતમધુના મદ્વિયોગેન દીનામ્ ।
કલ્યાણી સા કનકકદલીકન્દલીકોમલાઙ્ગી
કન્દર્પાગ્નિં કથમિવ કુકૂલાગ્નિકલ્પં સહેત ॥ ૧૨॥

અધ્વાનં તે હિતમુપદિશામ્યશ્રમેણૈવ ગન્તું
સ્નિગ્ધચ્છાયૈસ્તરુભિરભિતઃ શાન્તઘર્મપ્રચારમ્ ।
સંસ્કર્તાસિ ધ્રુવમુપગતો યત્ર પત્રીન્દ્ર તેષા-
મુદ્દામાનામપિ નવનવોદ્યાનલીલાયિતાનામ્ ॥ ૧૩॥

શ્રીકામાક્ષ્યા વિનતમમરૈરુત્સવં ફાલ્ગુનાખ્યં
    દૃષ્ટ્વા યાન્ત્યઃ સ્વભવનમુપારૂઢનાનાવિમાનાઃ ।
ત્વત્સઁલ્લાપશ્રવણતરલાઃ પશ્ચિમામ્ભોધિવેલા-
    પર્યન્તં તે વરુણનગરીમઞ્જુવાચઃ સહાયાઃ ॥ ૧૪॥

આકર્ષન્તઃ પ્રતિનવલતાપુષ્પગન્ધોપહારા-
    નાસિઞ્ચન્તઃ સરણિમભિતઃ શીતલૈઃ શીથુલેશૈઃ ।
ભૃઙ્ગીનાદૈર્મધુરમધુરં વ્યાહરન્તો વલન્તે
    કમ્પાકૂલોપવનપવના બન્ધવસ્તેઽનુકૂલાઃ ॥ ૧૫॥

વન્દસ્વારાત્ પ્રિયસખ પુનર્દર્શનાયાત્ર શૌરેઃ
    કાઞ્ચીભર્તુઃ  કરિગિરિતટે પુણ્યમેનં વિમાનમ્ ।
આધત્તે યત્ કનકવલભીનીડલીનૈઃ કપોતૈ-
    રધ્યાપ્યમ્ભોરુહભવમખાલગ્નધૂમાભિશઙ્કામ્ ॥ ૧૬॥

પીઠેષ્વષ્ટાદશસુ મહિતં કામપીઠં ભજેથાઃ
    પારેકમ્પં સ્વયમિહ પરા દેવતા સન્નિધત્તે ।
સભ્રૂચાપં નયનજલદં પ્રાપ્ય યસ્યાઃ કૃપાપં
    તુણ્ડીરક્ષ્મા સુલભકવિતાસસ્યવૃદ્ધિઃ સમિન્ધે ॥ ૧૭॥

ઉડ્ડીયાસ્માદ્ બકુલસરસાત્ સ ત્વમુદ્યાનદેશાત્
    પ્રાદક્ષિણ્યાદ્ વ્રજ પરિસરે પુણ્યમેકામ્રવૃક્ષમ્ ।
મૂલે યસ્ય પ્રકૃતિસુભગે મુક્તકૈલાસલોભો
    દેવઃ સાક્ષાદ્વસતિ વલયાઙ્કાહ્વયશ્ચન્દ્રચૂડઃ ॥ ૧૮॥

દૃષ્ટ્વા શમ્ભું ગગનસરણાવુજ્જિહાને ત્વયિ દ્રાક્
    પક્ષદ્વન્દ્વવ્યજનપવનોચ્ચાલિતાભ્યો લતાભ્યઃ ।
ઉત્થાસ્યન્તિ ભ્રમરતરુણાઃ સિક્તદેહા મરન્દૈ-
    રુદ્યાનશ્રીપ્રહિતસજલાપાઙ્ગભઙ્ગાનુકારાઃ ॥ ૧૯॥

સ્પષ્ટાલક્ષ્યસ્ત્વયિ પિક સમાલમ્બમાનેઽમ્બરાન્તં
    કાઞ્ચીદેશઃ કિમપિ વસુધાં ભૂષયન્ ગૌરવેણ ।
તત્સૌન્દર્યાપહૃતહૃદયો મા વિલમ્બસ્વ ગન્તું
    બન્ધુત્રાણાદ્ બહુમતિપદં નાપરં ત્વદ્વિધાનામ્ ॥ ૨૦॥

આશાં પાશાયુધતિલકિતામાશ્રયન્નાત્તવેગઃ
    કૂલોન્મીલત્ક્રમુકકુહલીચામરાન્દોલિતોર્મિમ્ ।

દ્રક્ષ્યસ્યગ્રે વિકચકમલોદ્ગન્ધિમાધ્વીકપાનાત્
ક્ષીબક્ષીબભ્રમરતરુણીસેવિતાં ક્ષીરસિન્ધુમ્ ॥ ૨૧॥

પક્ષોદ્ધૌતૈઃ પતગ પુરજિત્કન્ધરાકાણ્ડનીલૈ-
ર્વ્યાપ્તાભોગા વિસૃમરતરૈર્વ્યોમ સીમન્તયન્તી ।
સુવ્યક્તં તે ગમનસરણિઃ સૂત્રયેદૂર્ધ્વમસ્યાઃ
સિન્ધુસ્નેહોપગતયમુનાવેણિવીથીવિલાસમ્ ॥ ૨૨॥

ચૂતે ચૂતે કુસુમકલિકાં ત્વાં ચ દૃષ્ટ્વા સમેતં
બાલાશોકાહનનમરુણૈરઙ્ઘ્રિભિસ્તન્વતીનામ્ ।
તન્વઙ્ગીનાં શ્રવણસુભગૈર્નૂપુરાણાં વિરાવૈ-
ર્વાચાલાઃ સ્યુર્નિયતમભિતઃ કૂલમારામસીમાઃ ॥ ૨૩॥

સ્નાતોત્તીર્ણાઃ સજલકણિકાસુન્દરોરોજકુમ્ભાઃ
શ્યામાપઙ્કૈઃ શુભપરિમલૈઃ સ્પૃષ્ટમાઙ્ગલ્યભૂષાઃ ।
તીરે તસ્યા દ્રમિડસુદૃશો દર્શનીયા વિલોક્ય
પ્રાયો ભાવી ક્ષણમિવ સખે ગચ્છતસ્તે વિલમ્બઃ ॥ ૨૪॥

ધૂમસ્તોમૈઃ સવનજનિતૈર્ધૂસરોપાન્તવૃક્ષાઃ
પ્રૌઢશ્લાઘ્યૈર્મુખરિતમઠાઃ પાવનૈર્બ્રહ્મઘોષૈઃ ।
રુદ્ધાભોગા દ્વિજવરવિધિસ્નાનપૂતૈસ્તટાકૈ-
ર્દ્રષ્ટવ્યાસ્તે તદનુ સરિતં દક્ષિણેનાગ્રહારાઃ ॥ ૨૫॥

સા વૈદગ્ધી શ્રુતિષુ સ પુનઃ સર્વશાસ્ત્રાવગાહ-
સ્તચ્ચામ્લાનપ્રસરસરસં નિષ્કલઙ્કં કવિત્વમ્ ।
તત્રત્યાનાં કિમિહ બહુના સર્વમેતત્ પઠન્તઃ
શ‍ૃઙ્ગે શ‍ૃઙ્ગે ગૃહવિટપિનાં સ્પષ્ટયિષ્યન્તિ કીરાઃ ॥ ૨૬॥

તાનુલ્લઙ્ઘ્ય સ્મિતકુવલયસ્નિગ્ધમુત્કન્ધરાણાં
ચોલસ્ત્રીણામપિ સફલયન્ નેત્રમુત્પક્ષ્મમાલમ્ ।
વિલ્વક્ષેત્રં વિશ પશુપતેર્વેશ્મ નીવાસમીરૈ-
ર્ધૂતાલિન્દધ્વજપટશિખૈર્નૂનમાહૂયમાનઃ ॥ ૨૭॥

કામઃ સ્વામી કિલ શલભતામાપ નેત્રસ્ફુલિઙ્ગે
મા મા ભૈષીરિતિ ભવભિદો દર્શનાચ્ચન્દ્રમૌલેઃ ।
શ્યામા વર્ણે વચસિ મધુરા ચઞ્ચલા દૃગ્વિલાસે
વામોત્સઙ્ગે લસતિ કરુણા કાપિ કામં દુહાના ॥ ૨૮॥

પક્ષિસ્વાનૈઃ પટુમદકલૈઃ સ્વાગતાનિ બ્રુવાણા
    વ્યાકીર્ણાર્ઘ્યાઃ કુસુમમધુભિર્વીજયન્તઃ પ્રવાલૈઃ ।
તત્રારામાઃ સુરભિસચિવં ત્વાં સખે માનયેયુ-
    સ્તુલ્યપ્રીતિર્ભવતિ હિ જનો રાજવદ્રાજમિત્રે ॥ ૨૯॥

કાલે તસ્મિન્ કરધૃતગલન્નીવયો વારકાન્તાઃ
    સમ્ભોગાન્તે નિબિડલતિકામન્દિરેભ્યશ્ચલન્ત્યઃ ।
વીતસ્વેદાસ્તવ વિહરતઃ પક્ષપાલીસમીરૈ-
    રાખિન્નભ્રૂવલનમલસૈરર્ચયિષ્યન્ત્યપાઙ્ગૈઃ ॥ ૩૦॥

ભૂયો ગચ્છન્ જનપદમિમં સ ત્વમુલ્લઙ્ઘ્ય ચોલા-
    નાલોકેથાસ્તરલહરિણીનેત્રતાપિઞ્છિતાનિ ।
કાન્તારાણિ પ્રસવશયનૈશ્છિન્નગુઞ્જાકલાપૈઃ
    કુઞ્જે કુઞ્જે કથિતશબરદ્વન્દ્વલીલાયિતાનિ ॥ ૩૧॥

તત્રત્યાસ્ત્વાં કુસુમકલિકાશીથુધારાં વમન્તો
    નીરન્ધ્રેષુ સ્ખલિતગતયો નિર્ઝરીશીકરેષુ ।
વલ્લીડોલાવિહરદટવીદેવતાલાલનીયાઃ
    સેવિષ્યન્તે ચપલચમરીબાલભારાસ્સમીરાઃ ॥ ૩૨॥

ચુમ્બન્ બિમ્બાધરમિવ નવં પલ્લવં શીથુગર્ભં
    પ્રાપ્તાશ્લેષઃ  સ્તન ઇવ નવે કોરકે કામચારી ।
ભોક્તાસિ ત્વં કમપિ સમયં તત્ર માકન્દવલ્લીઃ
    કાન્તારાગે સતિ વિકસિતે કઃ પુમાંસ્ત્યક્તુમીષ્ટે ॥ ૩૩॥

દૃષ્ટ્વા ચઞ્ચ્વા કનકકપિશા મઞ્જરીશ્ચૂતષણ્ડાત્
    પક્ષચ્છાયાશબલિતનભોભાગમુદ્વત્વરં ત્વામ્ ।
વિદ્યુત્વન્તં નવજલધરં મન્યમાનાઃ સલીલં
    નર્તિષ્યન્તિ પ્રિયસખ ચલત્પિઞ્છભારા મયૂરાઃ ॥ ૩૪॥

દૃશ્યા દૂરે તદનુ લહરીસમ્પતદ્રાજહંસા
    સા કાવેરી મદજલઝરી સહ્યદન્તાવલસ્ય ।
મેઘશ્યામો ભુજગશયનો મેદિનીહારયષ્ટે-
    ર્મધ્યે યસ્યા મરતક ઇવ પ્રેક્ષ્યતે રઙ્ગનાથઃ ॥ ૩૫॥

પુણ્યાનસ્યાસ્તટભુવિ પુરીખર્વટગ્રામરુદ્ધા-

નુદ્યાનદ્રુપ્રસવસુરભીન્ હોસલાન્ ગાહમાનઃ ।
લક્ષ્મીનારાયણપુરમિતિ ખ્યાતમન્તર્મુરારેઃ
પ્રાપ્યાવાસં ભવ પિકપતે પાવનાનાં પુરોગઃ ॥ ૩૬॥

તત્રત્યાનાં રુચિરચિકુરન્યસ્તસૌગન્ધિકાનાં
તારુણ્યોષ્માઞ્ચિતકુચતટીવિત્રુટત્કઞ્ચુકાનામ્ ।
નાસામુક્તાભરણકિરણોન્મિશ્રમન્દસ્મિતાનાં
વેશસ્ત્રીણાં ભવતિ વિવશો વિભ્રમૈર્દર્પકોઽપિ ॥ ૩૭॥

તાશ્ચેન્માનગ્રથિતહૃદયાઃ સન્નતાન્ નાદ્રિયેરન્
કાન્તાઃ કાન્તાન્ પરભૃત કુહૂકારમેકં વિમુઞ્ચ ।
સન્તુ ત્રસ્યન્નિજનિજવધૂદોર્લતાલિઙ્ગિતાનાં
યૂનામાર્દ્રસ્મિતસહચરાસ્ત્વય્યપાઙ્ગાનુષઙ્ગાઃ ॥ ૩૮॥

ક્રીડન્તીનાં મુખરિતલતામન્દિરં ખેચરીણાં
ભૂષાનાદૈર્ભુવનવિદિતં સહ્યશૈલં શ્રયેથાઃ ।
ક્ષત્રધ્વંસાત્ સ્વયમુપરતો વિપ્રસાત્કૃત્ય કૃત્સ્નં
પૃથ્વીચક્રં ભૃગુકુલપતિર્યત્તટે સન્નિધત્તે ॥ ૩૯॥

ત્વઞ્ચદ્રૂમાન્ દવહુતભુજો જ્વાલમાલાજટાલાન્
વલ્ગદ્ભૃઙ્ગાન્ વનવિટપિનો ભાસુરાન્ પલ્લવૌઘૈઃ ।
દૃષ્ટ્વા દૂરાદનુમિનુતમામુષ્ણશીતૈઃ સમીરૈઃ
સન્દિગ્ધાયાં વિપદિ સહસાવૃત્તિરાર્તિં હિ સૂતે ॥ ૪૦॥

દૃષ્ટ્વા તત્રામલકધરણીમન્દિરં શાર્ઙ્ગપાણિં
તસ્માચ્છૈલાત્તટમવતરન્ કિઞ્ચિદાકુઞ્ચ્ય પક્ષૌ ।
કૂલેઽમ્ભોધેઃ ક્રમુકકલિલાં કેરલક્ષોણિમગ્રે
પશ્ય સ્ફીતાં ભૃગુસુતભુજાવિક્રમોપક્રમં યા ॥ ૪૧॥

પ્રાપ્તવ્યસ્તે યદિ કૃતમહો વાઞ્મયીતીરવાસી
દેવો દક્ષાધ્વરવિમથનોડ્ડામરશ્ચન્દ્રચૂડઃ ।
આસ્તે શાતત્રિશિખશિખયા દારુકં જઘ્નુષી સા
યસ્યાદૂરે મૃગપતિશિરસ્તસ્થુષી ભદ્રકાલી ॥ ૪૨॥

સિક્તઃ સ્વચ્છૈર્ઝરજલકણૈસ્તં ભજ વ્યોમ્નિ તિષ્ઠન્
મુક્તાચ્છન્નાસિતનવપટીકાયમાનાયમાનઃ ।
ધ્વાઙ્ક્ષભ્રાન્ત્યા યદિ પરિજનાસ્ત્વાં સમુત્સારયેરન્

કૂજાં કિઞ્ચિત્ કુરુ નનુ ગિરા વ્યજ્યતે સન્નસંશ્ચ ॥ ૪૩॥

ઇત્થં ભક્ત્યા પુરમથનમારાધ્ય લબ્ધપ્રસાદઃ
કૃષ્ટઃ કૃષ્ટઃ પથિ પથિ સખે કેરલીનાં કટાક્ષૈઃ ।
ઉચ્ચૈઃ સૌધૈરુડુગણગતીરુર્ધ્વમુત્સારયન્તીં
કુલ્લારામાં પ્રવિશ પુરલીક્ષ્માભૃતાં રાજધાનીમ્ ॥ ૪૪॥

યેષાં વંશે સમજનિ હરિશ્ચન્દ્રનામા નરેન્દ્રઃ
પ્રત્યાપત્તિઃ પતગ યદુપજ્ઞં ચ કૌમારિલાનામ્ ।
યુદ્ધે યેષામહિતહતયે ચણ્ડિકા સન્નિધત્તે
તેષામેષાં સ્તુતિષુ ન ભવેત્ કસ્ય વક્ત્રં પવિત્રમ્ ॥ ૪૫॥

પુત્રસ્યાસૌ પ્રિયસખ ઇતિ પ્રીતિગર્ભૈઃ કટાક્ષૈ-
ર્દૃષ્ટસ્તસ્યાં પુરિ વિહરતા રુક્મિણીવલ્લભેન ।
તસ્યૈવાગ્રે સદયમબલાલૂનસૂનપ્રવાલે
બાલોદ્યાને ક્વચન વિહરન્ માર્ગખેદં વિજહ્યાઃ ॥ ૪૬॥

કેલીયાનક્વણિતરશના કોમલાભ્યાં પદાભ્યા-
માલીહસ્તાર્પિતકરતલા તત્ર ચેદાગતા સ્યાત્ ।
સ્વાતી નામ ક્ષિતિપતિસુતા સેવિતું દેવમસ્યાઃ
સ્વૈરાલાપૈસ્તવ પિક ગિરાં કાપિ શિક્ષા ભવિત્રી ॥ ૪૭॥

તામાયાન્તીં સ્તનભરપરિત્રસ્તભુગ્નાવલગ્નાં
સ્વેદચ્છેદચ્છુરિતવદનાં શ્રોણિભારેણ ખિન્નામ્ ।
કિઞ્ચિચ્ચગ્ચૂકલિતકલિકાશીથુભારેણ સિઞ્ચે-
શ્ચઞ્ચચ્ચિલ્લીચલનસુભગાન્ લપ્સ્યસેઽસ્યાઃ કટાક્ષાન્ ॥ ૪૮॥

કચ્ચિત્કાલં ધુતકિસલયાચ્છાદનં સપ્રકમ્પં
પ્રત્યાખ્યાતભ્રમરતરુણા મઞ્જરી ભુજ્યમાના ।
યાત્રોદ્યુક્તે સુભગ ભવતિ વ્યઞ્જયેદાત્મસાદં
મુક્તાશ્ચ્યોતન્મધુરસમિષાન્મુઞ્ચતી બાષ્પલેશમ્ ॥ ૪૯॥

દિગ્યાતવ્યા યદપિ ભવતો દક્ષિણા રક્ષણાર્થં
મત્પ્રાણાનાં પુનરપિ સખે પશ્ચિમામેવ યાયાઃ ।
ધૂતારામં મુકુટતટિનીમારુતૈસ્તત્ર શમ્ભોઃ
સમ્પદ્ગ્રામં યદિ ન ભજસે જન્મના કિં ભૃતેન ॥ ૫૦॥

સૌધૈસ્તુઙ્ગૈર્હસદિવ સુધાક્ષાલિતૈ રાજતાદ્રિં
    તેજોરાશેઃ પ્રવિશ ભવનં ધૂર્જટેરૂર્જિતં તત્ ।
પાર્શ્વે પાર્શ્વે પરિચિતનમસ્કારજાતશ્રમાણાં
    ક્ષ્માદેવાનાં ક્ષણમનુભવંસ્તાલવૃન્તસ્ય લીલામ્ ॥ ૫૧॥

ઉત્કીર્ણાનાં કનકવલભીષૂદ્ગતો વિષ્કિરાણાં
    ત્યક્તાશઙ્કં પ્રણમ ગિરિશં ધ્યાનનિષ્કમ્પગાત્રઃ ।
કણ્ઠચ્છાયા પ્રતિફલતિ કિં  ભર્તુરિત્યદ્રિપુત્ર્યા
    નિધ્યાતઃ સન્ કુતુકનિભૃતૈર્નેત્રપાતૈઃ પવિત્રૈઃ ॥ ૫૨॥

શ્રીનન્દિભ્રૂનિયમિતમિથોરોધમાબદ્ધસેવાન્
    બ્રહ્મેન્દ્રાદ્યાન્ ક્વચન વિબુધાન્ સાદરં વીક્ષમાણઃ ।
ગાયન્તીનાં ક્વચિદપિ સખે કોમલાન્ કિન્નરીણાં
    વીણારાવાનુપશૃણુ ભવત્કૂજિતેનાવિશિષ્ટાન્ ॥ ૫૩॥

દિવ્યૈશ્વર્યં દિશસિ ભજતાં વર્તસે ભિક્ષમાણો
    ગૌરીમઙ્કે વહસિ ભસિતં પઞ્ચબાણં ચકર્થ ।
કૃત્સ્નં વ્યાપ્ય સ્ફુરસિ ભુવનં મૃગ્યસે ચાગમાન્તૈઃ
    કસ્તે તત્ત્વં પ્રભવતિ પરિચ્છેત્તુમાશ્ચર્યસિન્ધો ॥ ૫૪॥

ઇત્થં સ્તુત્વા બહિરુપવનોપાન્તમાકન્દશૃઙ્ગે
    યાવદ્ભાનુર્વ્રજતિ ચરમં ભૂધરં તાવદાસ્સ્વ ।
દ્રક્ષ્યસ્યન્વક્સફલનયનં તાણ્ડવાનીન્દુમૌલે-
    ર્લાસ્યક્રીડાલલિતગિરિજાપાઙ્ગસમ્ભાવિતાનિ ॥ ૫૫॥

તસ્મિન્ કાલે બલિમહજુષાં વારવામાલકાનાં
    સ્થાલીચક્રે સ્તનતટધૃતે સાનુરાગે હૃદીવ ।
બિમ્બવ્યાજાદ્વિશતિ ભવતિ સ્યાદમુષ્યેતિ શઙ્કે
    સ્પષ્ટાઙ્કસ્ય ક્ષણમુદયગસ્યેન્દુબિમ્બસ્ય લક્ષ્મીઃ ॥ ૫૬॥

વિષ્વક્કીર્ણૈરિવ પશુપતેઃ કન્ધરાકાન્તિપુઞ્જૈ-
    ર્વીતાલોકે જગતિ તિમિરૈર્વ્યોમનીલાબ્જભૃઙ્ગૈઃ ।
વિશ્રાન્તઃ સન્ ક્વચન વિપુલે વૃક્ષશાખાકુટુમ્બે
    તાં તત્રૈવ ક્ષપય રજનીં શ્રાન્તવિસ્રસ્તપક્ષઃ ॥ ૫૭॥

વેલાવાતાશ્ચરમજલધેર્વીચિમાન્દોલયન્તઃ
    સ્તોકોન્નિદ્રૈઃ કુમુદમુકુલૈઃ પીતમુક્તાઃ સરસ્સુ ।

સ્વેદાઙ્કૂરાન્ સુરતજનિતાન્ સુભ્રુવાં ચોરયન્તઃ
સેવિષ્યન્તે નિશિ પરભૃત ત્વાં સુખેન પ્રસુપ્તમ્ ॥ ૫૮॥

પ્રાપ્તોન્મેષે પ્રથમશિખરિપ્રસ્થદાવાગ્નિકલ્પે
બાલાશોકસ્તબકરુચિરે ભાનવીયે મયૂખે ।
પ્રસ્થાતું ત્વં પુનરપિ સખે પ્રક્રમેથાઃ પ્રભાતે
સ્વાત્મક્લેશઃ સુહૃદુપકૃતૌ ત્વાદૃશાનાં સુખાય ॥ ૫૯॥

પદ્મોપાન્તાદુષસિ રમણે પ્રાપ્નુવત્યેવ પાર્શ્વં
મધ્યે મારજ્વરપરવશાં વીક્ષમાણો રથાઙ્ગીમ્ ।
દૂરં પ્રાપ્તે મયિ વિધિવશાદ્દૂયમાનાં સખીં તે
સ્મારં સ્મારં દ્વિગુણગમનોત્સાહ એવ ધ્રુવં સ્યાઃ ॥ ૬૦॥

દૃષ્ટ્વા દેવં પરિસરજુષં શમ્બરે બાલકૃષ્ણં
લોપામુદ્રાસખતિલકિતં દિઙ્મુખં ભૂષયિષ્યન્ ।
કોલાનેલાવનસુરભિલાન્ યાહિ યત્ર પ્રથન્તે
વેલાતીતપ્રથિતવચસઃ શઙ્કરાદ્યાઃ કવીન્દ્રાઃ ॥ ૬૧॥

ઉન્મજ્જદ્ભિઃ પુનરિવ જવાત્ પક્ષવદ્ભિર્ગિરીન્દ્રૈ-
ર્વૃન્દૈર્નાવાં ભુજપટલિકોઙ્કામરૈર્ગાહ્યમાનમ્ ।
લક્ષ્મીજાનેઃ શયનસદનં પુષ્પવાટં પુરારેઃ
પાકસ્થાનં નિખિલમરુતાં પશ્ય વારાન્નિધાનમ્ ॥ ૬૨॥

મુક્તાજાલૈર્ધવલપુલિનં વીચિમાલાવિકીર્ણૈઃ
કૂલાધ્વાનં કુસુમિતતરુસ્નિગ્ધમાલમ્બમાનઃ ।
દેશાદ્દેશં વ્રજસિ કુતુકોત્તાનમુગ્ધાનનાનાં
વામાક્ષીણાં નયનચુલકૈઃ સાદરં પીયમાનઃ ॥ ૬૩॥

કુર્યાત્ પ્રીતિં તવ નયનયોઃ કુક્કુટક્રોડનામ
પ્રાસાદાગ્રોલ્લિખિતગગનં પત્તનં તત્ પ્રતીતમ્ ।
યદ્દોર્વીર્યદ્રઢિમકરદીભૂતરાજન્યવીરાઃ
શૂરાગ્રણ્યઃ શિખરિજલધિસ્વામિનઃ પાલયન્તિ ॥ ૬૪॥

ગેહે ગેહે નવનવસુધાક્ષાલિતં યત્ર સૌધં
સૌધે સૌધે સુરભિકુસુમૈઃ કલ્પિતં કેલિતલ્પમ્ ।
તલ્પે તલ્પે રસપરવશં કામિનીકાન્તયુગ્મં
યુગ્મે યુગ્મે સ ખલુ વિહરન્ વિશ્વવીરો મનોભૂઃ ॥ ૬૫॥

વ્યર્થં કર્ણે નવકુવલયં વિધ્યમાને કટાક્ષે
ભારો હારઃ સ્તનકલશયોર્ભાસુરે મન્દહાસે ।
યત્ર સ્નિગ્ધેષ્વપિ કચભરેષ્વેણશાબેક્ષણાનાં
માદ્યદ્ભૃઙ્ગે સતિ પરિમલે મઙ્ગલાય પ્રસૂનમ્ ॥ ૬૬॥

યત્ર જ્ઞાત્વા કૃતનિલયનામિન્દિરામાત્મકન્યાં
મન્યે સ્નેહાકુલિતહૃદયો વાહિનીનાં વિવોઢા ।
તત્તદ્વીપાન્તરશતસમાનીતરત્નૌઘપૂર્ણં
નૌકાજાલં મુહુરુપહરન્ વીચિભિઃ શ્લિષ્યતીવ ॥ ૬૭॥

તત્સૌધાગ્રેષ્વરુણદૃષદાં સાન્દ્રસિન્દૂરકલ્પં
તેજઃપુઞ્જં કિસલયધિયા ચર્વિતું મારભેથાઃ ।
દૃષ્ટ્વા વાતાયનવિનિહિતૈર્લોચનાબ્જૈસ્તરુણ્યો
વલ્ગદ્વક્ષોરુહમુપચિતૈર્હસ્તતાલૈર્હસેયુઃ ॥ ૬૮॥

કૃષ્ટ્વા દૃષ્ટિં કથમપિ તતઃ કૌતુકાનાં નિદાના-
દુડ્ડીયેથાઃ પથિ વિટપિનાં પુષ્પમાધ્વીં લિહાનઃ ।
હારં હારં મદનપૃતનાકાહલૈઃ કણ્ઠનાદૈ-
રુત્કણ્ઠાનાં જનપદમૃગીલોચનાનાં મનાંસિ ॥ ૬૯॥

બ્રહ્માભ્યાસપ્રશમિતકલીન્ પ્રાપ્ય દીપ્રાન્ પ્રકાશાન્
શ્વેતારણ્યં વ્રજ બહુમતં ધામ મૃત્યુઞ્જયસ્ય ।
દૃષ્ટ્વા દૂરે સકૃદપિ જના યન્ન પશ્યન્ત્યવશ્યં
મૃત્યોર્વક્ત્રં નિટિલઘટિતભ્રૂકુટીકં કદાચિત્ ॥ ૭૦॥

સેવ્યં શમ્ભોરરુણમુરસસ્તાડનાદ્દણ્ડપાણેઃ
પાદામ્ભોજં શિખરિતનયાપાણિસંવાહયોગ્યમ્ ।
યેનાક્રાન્તે સતિ ગિરિપતૌ લોષ્ટમાનાસ્યચક્ર-
શ્ચક્રન્દાધઃકૃતભુજવનો રક્ષસાં ચક્રવર્તી ॥ ૭૧॥

પાર્શ્વે યસ્ય પ્રવહતિ નિલા નામ કલ્લોલિની સા
સન્ધ્યાનૃત્તભ્રમિષુ પતિતા મસ્તકાજ્જાહ્નવીવ ।
નાવાક્ષેત્રપ્રણયિ રમયાક્રાન્તદોર્મધ્યમાસ્તે
કૂલે યસ્યાઃ કુવલયદલશ્યામલં ધામ કિઞ્ચિત્ ॥ ૭૨॥

સાકં કાન્તૈર્મિલતિ લલિતં કેરલીનાં કદમ્બે

મત્પ્રેયસ્યાઃ પ્રિયસખ મહામાઘસેવાગતાયાઃ ।
પાયં પાયં મુખપરિમલં મોહનં યત્ર મત્તાઃ
પ્રાયોઽદ્યાપિ ભ્રમરકલભા નૈવ જિઘ્રન્તિ પદ્માન્ ॥ ૭૩॥

શૈવાલૌઘચ્છુરિતકમલા સૈકતસ્રંસિહંસા
નીતા કાર્શ્યં તપનકિરણૈર્વાસરેષ્વેષુ સિન્ધુઃ ।
આકીર્ણાસ્યામલકનિકરૈઃ શ્રોણિવિભ્રંશિકાઞ્ચીં
મન્યે દીનાં વિરહદશયા પ્રેયસીં મેઽનુયાયાત્ ॥ ૭૪॥

શાસ્તા તસ્યા યદિ તટપથૈઃ શમ્બરક્રોડવાસી
તિષ્ઠન્નશ્વે જવિનિ મૃગયાકૌતુકી સઞ્ચરેત ।
લુમ્પેસ્તસ્ય શ્રમજલકણાન્ કોમલૈઃ પક્ષવાતૈ-
ર્ભૂયાત્ પ્રીત્યૈ લઘુ ચ સમયે સેવનં હિ પ્રભૂણામ્ ॥ ૭૫॥

સર્વોત્કૃષ્ટા જગતિ વિદિતાઃ કેરલેષુ દ્વિજેન્દ્રા
વલ્લીકૌણ્યોસ્તદપિ મહિમા કાપિ મધ્યશ્રિતાનામ્ ।
તત્રાપ્યસ્યાઃ સલિલપવના યત્ર યત્ર પ્રથન્તે
તેષાં તેષામતિશયજુષઃ શીલવિદ્યાનુભાવાઃ ॥ ૭૬॥

ઈષ્ટે તેષાં સ્તુતિષુ ન ગુરુઃ કા કથાલ્પીયસાં નો
ભ્રાતર્ભૂયઃ શ◌ૃણુ પરિમિતં પ્રસ્તુતાદ્યાવશેષમ્ ।
તામુત્તીર્ણઃ સરિતમમૃતસ્યન્દિમાકન્દવૃન્દાન્
દેશાન્ પૂતાન્ પત ગુણગણૈર્નેત્રનારાયણીયૈઃ ॥ ૭૭॥

યઃ પ્રાક્પાણિગ્રહણસમયે શમ્ભુના સાનુકમ્પં
હસ્તે કૃત્વા કથમપિ શનૈરશ્મપૃષ્ઠે ન્યધાયિ ।
દ્રષ્ટવ્યોઽસૌ કિસલયમૃદુર્મુક્તિપુર્યાલયાયાઃ
કાત્યાયન્યા મહિષમથનોડ્ડામરઃ પાદપદ્મઃ ॥ ૭૮॥

કિઞ્ચિત્પૂર્વં રણખલભુવિ શ્રીમદધ્યક્ષયેથા-
સ્તન્મીમાંસાદ્વયકુલગુરોઃ સદ્મ પુણ્યં મહર્ષેઃ ।
વિદ્વદ્વૃન્દે વિવદિતુમનસ્યાગતે યત્ર શશ્વ-
દ્વ્યાખ્યાશાલાવલભિનિલયસ્તિષ્ઠતે કીરસઙ્ઘઃ ॥ ૭૯॥

શાસ્ત્રવ્યાખ્યા હરિહરકથા સત્ક્રિયાભ્યાગતાના-
માલાપો વા યદિ સહ બુધૈરાક્ષિપેદસ્ય ચેતઃ ।
તદ્વિસ્રબ્ધદ્વિજપરિવૃતે નિષ્કુટાદ્રૌ નિષણ્ણઃ

કોકૂયેથાઃ સ ખલુ મધુરાં સૂક્તિમાકર્ણ્ય તુષ્યેત્ ॥ ૮૦॥

શ્લાઘ્યચ્છન્દસ્થિતિમપિ મયા શોભનેઽર્થે નિયુક્તં
શ્રાવ્યં શબ્દૈઃ સરસસુમનોભાજમભ્રાન્તવૃત્તિમ્ ।
દૂરપ્રાપ્ત્યા પ્રશિથિલમિવ ત્વાં સખે કાવ્યકલ્પં
ધીમાન્ પશ્યેત્ સ યદિ નનુ તે શુદ્ધ એવ પ્રચારઃ ॥ ૮૧॥

પાર્શ્વાદસ્ય પ્રચલિતવતઃ પાવનાનાહરન્તઃ
કુન્દસ્વચ્છાન્ વૃષપતિમુખાસક્તરોમન્થફેનાન્ ।
છિન્દ્યુસ્તાપં તવ વૃષપુરીસઙ્ગિનઃ શઙ્કરાઙ્ક-
ક્રીડદ્ગૌરીકચતરલનોદ્ગન્ધયો ગન્ધવાહાઃ ॥ ૮૨॥

પૂર્વો ભાગઃ સ્તનભરનતઃ પ્રેક્ષ્યતે ચેચ્ચલાક્ષઃ
પશ્ચાદ્ભાગો લલિતચિકુરો દૃશ્યતે નો નિતમ્બી ।
ઇત્થં ગૌર્યા યુગપદુભયં દ્રષ્ટુકામોઽષ્ટમૂર્તિ-
ર્મૂર્તિદ્વન્દ્વં વહતિ ભગવાન્ યઃ સ મુક્ત્યૈ નિષેવ્યઃ ॥ ૮૩॥

ભૂષાભોગિશ્વસિતપવનૈઃ ભાલનેત્રે પ્રદીપ્તે
સ્વિન્નસ્યેન્દોરમૃતપૃષતૈરૂર્જિતં નિર્ગલદ્ભિઃ ।
મૌલૌ યસ્ય દ્રુહિણશિરસાં મણ્ડલં મણ્ડપાન્તઃ-
ક્ષ્માદેવાનાં શ્રુતિપદજુષાં સંશયાનુચ્છિનત્તિ ॥ ૮૪॥

દ્વારોપાન્તસ્થિતિકૃદણિમાપાઙ્ગદત્તેહિતાર્થૈ-
રાશાપાલૈર્નિબિડિતબહિઃપ્રાઙ્ગણં સેવમાનૈઃ ।
તસ્યાદૂરે કનકભવનં પક્ષપાતાત્ પ્રવિષ્ટઃ
સમ્પન્મૂર્તિં પ્રણમ ગિરિજાં સા હિ વિશ્વસ્ય માતા ॥ ૮૫॥

સંસર્પદ્ભિસ્તનુરુચિભરૈઃ સઙ્ગમગ્રામશૌરે-
સ્તાપિઞ્છાભૈઃ સ્તબકિતતલં ગાહમાનો વિહાયઃ ।
તુલ્યચ્છાયસ્મૃતનવતમાલાવલીવાસસૌખ્યો
મન્યે લોકૈઃ ક્ષણમિવ પૃથઙ્નો વિભાવિષ્યસે ત્વમ્ ॥ ૮૬॥

કાલીવાસં ભજ પથિ મહત્ કાનનં યત્ર શશ્વત્
સેવાયાતે ત્રિદશનિકરે શ્રાદ્ધદેવૌપવાહ્યમ્ ।
ભૂતૈર્ભેદ્યો બલિમહિષ ઇત્યુદ્ભટૈઃ કૃષ્ટશ‍ૃઙ્ગે
રજ્જુગ્રાહં રુદતિ વિજયા રૂઢહાસં રુણદ્ધિ ॥ ૮૭॥

રમ્યાં હર્મ્યધ્વજપટમરુદ્વીજિતબ્રધ્નયુગ્યા-
મગ્રે પશ્યાગ્જનખલપુરીમાશ્રિતાં શઙ્કરેણ ।
યત્રાશ્લિષ્ટો વરયુવતિભિશ્ચુમ્બતિ સ્વિન્નગણ્ડં
ચૂર્ણીવાતઃ પ્રિય ઇવ રતિશ્રાન્તમાસ્યારવિન્દમ્ ॥ ૮૮॥

સા ચ પ્રેક્ષ્યા સરિદનુપદં યત્ર કલ્માષિતાયાં
મજ્જન્માહોદયપુરવધૂકણ્ઠકસ્તૂરિકાભિઃ ।
રક્તાઃ પદ્માઃ કુવલયવનીસામ્યમાપદ્યમાના
વિજ્ઞાયન્તે સ્ફુટમહિમધામોદયે જૃમ્ભમાણે ॥ ૮૯॥

ચારુસ્વચ્છા શફરનયના ચક્રવાકસ્તનશ્રીઃ
કલ્લોલભ્રૂઃ કમલવદના કમ્રશૌવાલકેશા ।
સંસેવ્યા સ્યાત્ સરસમધુરા સાનુકૂલાવતીર્ણૈ-
ર્દુર્ગાહાન્યૈરિતિ હિ સરણિઃ કાપિ ગામ્ભીર્યભાજામ્ ॥ ૯૦॥

ત્વય્યાકાશે સુભગ તટિનીં લમ્બમાને સલીલં
બિમ્બં દૃષ્ટ્વા પયસિ મણિભઙ્ગામલે કમ્પમાનમ્ ।
વીચીવેગપ્રચલદસિતામ્ભોજિનીગુચ્છબુદ્ધ્યા
કૂજં કૂજં મધુરમલયઃ કોકિલ વ્યાલપેરન્ ॥ ૯૧॥

તીરં તસ્યાઃ પ્રતિ ગતવતો દક્ષિણં તત્ક્ષણં તે
દેશઃ સર્વાતિશયિવિભવો દૃક્પથેતઃ પ્રથેત ।
તાં જાનીયા દિશિ દિશિ જયન્તાખ્યયા ખ્યાયમાનાં
પ્રત્યાદિષ્ટત્રિદિવનગરપ્રાભવાં પ્રાપ્યભૂમિમ્ ॥ ૯૨॥

બાલોદ્યાનૈઃ સમદમહિલાભુક્તવલ્લીનિકુઞ્જૈઃ
કેલીહંસક્ષુભિતનગરભ્રાન્તભૃઙ્ગૈઃ સરોભિઃ ।
રત્નશ્રેણીઘટિતશિખરૈર્ગોપુરૈઃ સા પુરી તે
પ્રાયઃ પ્રજ્ઞાભરણ સુગમા સ્યાદનાવેદિતાપિ ॥ ૯૩॥

ઉત્તરભાગઃ

લક્ષ્મીજન્મસ્થિતિમનુપમૈઃ પૂરિતાં રત્નજાલૈ-
ર્ભૂભૃદ્ગર્ભાં પ્રકટિતકલેશોદયશ્લાઘ્યવૃદ્ધિમ્ ।
પાથોરાશેસ્તનુમિવ પરાં મન્યમાનો વિશાલાં
યામધ્યાસ્તે સ ખલુ નિગમામ્ભોજભૃઙ્ગો રથાઙ્ગી ॥ ૧॥

વક્ત્રૌપમ્યં વહતિ વિમલં પશ્ય પાર્શ્વે સુધાંશોઃ
પશ્ચાદ્ભાગં સુમુખિ  રમણૈરિત્થમાવેદ્યમાનાઃ ।
હર્મ્યે યસ્યાં હરિણનયનાઃ કુર્વતેઽસ્મિન્ કલઙ્કં
દૃષ્ટ્વા સેર્ષ્યા ઇવ કુવલયાધ્યેયશોભૈરપાઙ્ગૈઃ ॥ ૨॥

વીથ્યાં વીથ્યાં વલરિપુશિલાભઙ્ગબદ્ધસ્થલાયાં
સમ્મૂર્છદ્ભિઃ કિરણપટલૈસ્ત્વદ્રુરુજ્જાલનીલૈઃ ।
યત્રારબ્ધે દિનકરકરૈરપ્યહાર્યેઽન્ધકારે
લોલાક્ષીણાં ભવતિ દિવસે નિર્વિશઙ્કોઽભિસારઃ ॥ ૩॥

યસ્યાં રાત્રૌ યુવતિવદનામ્ભોજસૌન્દર્યચૌર્યાત્
સત્યં સૌધધ્વજપટશિખાઘૃષ્ટબિમ્બે હિમાંશૌ ।
દૃષ્ટ્વા કૃષ્ણં કિણમણિકણં હન્ત ગાઢં પ્રરૂઢં
મૂઢો લોકો વદતિ શશકો રોહિતોઽન્યત્તથેતિ ॥ ૪॥

વીચીક્ષિપ્તા ઇવ સુરધુનીબાલશૈવાલમાલા
યત્રોદીર્ણા મરતકરુચશ્ચન્દ્રશાલાતલેભ્યઃ ।
ઘાસભ્રાન્ત્યા ગગનપદવીદીર્ઘપાન્થાયમાના-
શ્ચઞ્ચત્પ્રોથં તરણિતુરગાશ્ચર્વિતું પ્રારભન્તે ॥ ૫॥

યત્રોદ્યાને મલિનિતદિશાકુઞ્જપુઞ્જે તરૂણાં
શ‍ૃઙ્ગે લગ્ના ભ્રમરપટલીનિર્વિશેષાઃ પયોદાઃ ।
વાપીષ્વમ્બૂન્યધિકસુરભીણ્યુત્સૃજન્તિ સ્વકાલે
સોપાનાગ્રસ્ફટિકકિરણોજ્જૃમ્ભણામ્રેડિતાનિ ॥ ૬॥

અન્યામગ્રે મમ મણિગૃહે ભુક્તવાનિત્યવાદી-
ર્મુગ્ધે કાન્તો ધૃતનખપદા ભિત્તિલીના કિમેષા ।
ઇત્થં યસ્યાં સ્મિતલવજુષો હ્રેપયન્તે નવોઢાં
સખ્યસ્તસ્યાસ્તનુમનુપમાં બિમ્બિતાં દર્શયન્ત્યઃ ॥ ૭॥

ચિલ્લીવલ્યા ધનુષિ ઘટિતે ક્ષિપ્ત એવેક્ષુકાણ્ડો
નેત્રોપાન્તે વહતિ શરતાં ન્યસ્તમેવારવિન્દમ્ ।
રોમાવલ્યામપિ ગુણદશાં યત્ર બિમ્બાધરાણાં
બિભ્રાણાયાં મદનવિભુના ભ્રંશિતૈવાલિમાલા ॥ ૮॥

શ‍ૃઙ્ગારાબ્ધિપ્લવ ઇવ ગલદ્વેણિ કમ્પ્રસ્તનં તત્
ભ્રશ્યન્નીવિ સ્થિતમિતિ વિટા વીક્ષ્ય સંશ્લિષ્ય યત્ર ।

મુગ્ધાક્ષીણાં મુકુલિતદૃશાં મોહનાડમ્બરાન્તે
ભૂયઃ શ્રાન્તં પુનરપિ રતોદ્યોગમુદ્વેલયન્તિ ॥ ૯॥

યસ્યાં મેઘા હરિમણિશિલાહર્મ્યપર્યન્તભાજો
ન જ્ઞાયેરન્ શ્રવણસુભગં ગર્જિતં ચેન્ન દધ્યુઃ ।
વિદ્યુદ્વલ્લી પુનરપિ નવારબ્ધસંભોગલીલા-
વેલ્લત્કાન્તાવિપુલજઘનસ્રસ્તકાઞ્ચીસમૈવ ॥ ૧૦॥

તસ્યાં લક્ષ્મીરમણનિલયં દક્ષિણેનેક્ષણીયં
મત્કાન્તાયાઃ સદનમભિતો વેષ્ટિતં રત્નસાલૈઃ ।
મધ્યે સૌધં કનકઘટિતં બિભ્રદૂઢચ્છદૌઘે
યસ્મિન્નમ્ભોરુહ ઇવ કનત્કર્ણિકે ખેલતિ શ્રીઃ ॥ ૧૧॥

માહાભાગ્યં રતિપતિભુજાડમ્બરઃ પૌનરુક્ત્યાત્
કલ્યાણૌઘઃ સ્ફુરતિ રસિકાનન્તતાપ્યત્ર હીતિ ।
એષામાદ્યક્ષરગણમુપાદાય બદ્ધેન નામ્ના
માન્યં મારક્કરનિલયનં યત્કવીન્દ્રા ગૃણન્તિ ॥ ૧૨॥

લીલાવાપી લસતિ લલિતા તત્ર સોપાનમાર્ગે
માણિક્યાંશુસ્ફુરણસતતસ્મેરનાલીકષણ્ડા ।
યત્રાયાન્ત્યાઃ પયસિ વિમલે સ્નાતુમસ્મત્પ્રિયાયા
મન્યે યાનાભ્યસનવિધયે મલ્લિકાક્ષા વસન્તિ ॥ ૧૩॥

તસ્યાસ્તીરે પુનરુપવનં તત્ર ચૂતોઽસ્તિ પોત-
સ્ત્વજ્જતીયૈઃ પિક પરિવૃતઃ પલ્લવાસ્વાદલુબ્ધૈઃ ।
પાર્શ્વે ચાસ્ય સ્તબકનમિતા માધવીમુગ્ધવલ્લી
પ્રેયસ્યા મે પરિણયમહં પ્રાપિતૌ સાદરં યૌ ॥ ૧૪॥

તસ્યાદૂરે મરતકતલે હેમબદ્ધાલવાલઃ
સિક્તો મૂલે હિમજલભરૈશ્ચમ્પકઃ કશ્ચિદાસ્તે ।
લબ્ધ્વા સખ્યાસ્તવ સ સુકૃતી સ્મેરવક્ત્રાબ્જરાગં
સૂતે તસ્યાસ્તનુલતિકયા તુલ્યવર્ણં પ્રસૂનમ્ ॥ ૧૫॥

ક્રીડાનૃત્તે ભવનશિખિનાં દૂરમુક્તાહિસઙ્ગા
સાન્દ્રચ્છાયાહૃતરવિકરા તત્ર પાટીરવાટી ।
મધ્યે તસ્યાં સ ખલુ લતિકામણ્ડપો રત્નભૂમિઃ
શશ્વદ્યસ્મિન્ કિમપિ વલતિ સ્માવયોઃ પ્રેમવલ્લી ॥ ૧૬॥

સ્નિગ્ધસ્કન્ધસ્રુતમધુરસઃ કિઞ્ચ તસ્યોપકણ્ઠે
 કૂજદ્ભૃઙ્ગઃ કુરવકતરુર્યઃ કુરઙ્ગેક્ષણાયાઃ ।
કાલે કાલે કરિકરશિરોવિભ્રમાભ્યાં ભુજાભ્યા-
 માશ્લિષ્ટાઙ્ગો વહતિ મુકુલચ્છદ્મના રોમભેદાન્ ॥ ૧૭॥

સ્થાનેષ્વેષુ ક્વચન કથિતેષૂત્સુકા પુષ્પશય્યા-
 મધ્યાસીના પરિજનકૃતાં સા ન ચેદીક્ષિતા સ્યાત્ ।
પ્રાસાદોઽસ્યાઃ પરમભિમતઃ કોઽપિ માહેન્દ્રનીલ-
 સ્તસ્મિન્ દૃશ્યા તટિદિવ ઘને ચારુરૂપા પ્રિયા મે ॥ ૧૮॥

સા નેત્રાણામમૃતગુલિકા સૃષ્ટિસારો વિધાતુઃ
 સૌન્દર્યેન્દોઃ પ્રથમકલિકા દીપિકા ભૂતધાત્ર્યાઃ ।
કન્દર્પસ્ય ત્રિભુવનવિભોઃ કાઞ્ચની કેતુયષ્ટિઃ
 શૃઙ્ગારાબ્ધેઃ શશધરકલા જીવિતં મે દ્વિતીયમ્ ॥ ૧૯॥

પશ્યન્નેનાં બહલસુષમામણ્ડલાન્તર્નિમગ્નાં
 મધ્યેઽન્યાસામપિ ચલદૃશાં જ્ઞાસ્યસે નો કથં ત્વમ્ ।
જ્તોત્સ્નાજાલસ્નપિતભુવના તારકાણાં સમીપે
 ચાન્દ્રી મૂર્તિઃ કથય જગતો જ્ઞાપ્યતે કેન રાત્રૌ ॥ ૨૦॥

સાન્દ્રામોદસ્તિમિરનિકરશ્ચન્દ્રમા નિષ્કલઙ્કઃ
 શૈલૌ હૈમૌ ભ્રમરપટલીકીલિતો વ્યોમભાગઃ ।
કમ્રં ચક્રં મૃદુકરિકરદ્વન્દ્વમબ્જે સલીલે
 સર્વં ચૈતન્મદનઘટિતં સૌમ્ય સમ્ભૂય સાભૂત્ ॥ ૨૧॥

નીચીકુર્વન્ત્યલસવલિતા નેત્રપાતાઃ કુરઙ્ગાન્
 વીચીગર્વં હરતિ નિખિલં વિભ્રમાન્દોલિતા ભ્રૂઃ ।
પાણી કલ્પદ્રુમકિસલયપ્રાભવં ન ક્ષમેતે
 વાણી તસ્યા વહતિ ભવતાં પઞ્ચમૈર્બાલમૈત્રીમ્ ॥ ૨૨॥

સા કાન્તિશ્ચેદ્દ્રવતિ કનકં તન્મુખં ચેત્ ક ઇન્દુઃ
 સા ચેદ્ બિમ્બાધરમધુરતા તિક્તતામેતિ માધ્વી ।
સા વા તસ્યા યદિ તનુલતા માલતી લોહતુલ્યા
 તૌ ચેદૂરૂ કનકકદલીસ્તમ્ભયોઃ ક્વાપિ ડમ્ભઃ ॥ ૨૩॥

ઉક્તેષ્વેવ પ્રસજતિ પુનર્નવ્યલાવણ્યસારે-

ષ્વઙ્ગેષ્વસ્યા મમ કથયતો હન્ત વાચાં પ્રવૃત્તિઃ ।
તાદૃગ્ભૂતે મનસિ વિવશે કિન્નુ કુર્વીત સેયં
યદ્યચ્ચેતો વિમૃશતિ ગિરાં તત્તદેવાભિધેયમ્ ॥ ૨૪॥

અથ પ્રાયઃ પ્રણયિનિ મયિ પ્રોષિતે ભાગ્યદોષાત્
કલ્પપ્રાયૈરહહ દિવસૈરેભિરુત્કણ્ઠમાના ।
સઞ્જાયેત પ્રબલવિરહોદ્વેજિતા પેશલાઙ્ગી
મૂર્છદ્ધર્મજ્વરપરવશા નીલકણ્ઠીવ ખિન્ના ॥ ૨૫॥

યત્રાપાઙ્ગદ્યુતિકવચિતે કિઞ્ચિદુત્સાર્ય કેશાન્
દત્તઃ પ્રેમ્ણા દિનમનુ મયા દીર્ઘિકારક્તપદ્મઃ ।
તસ્મિન્નસ્યા ભવતિ નિયતં હન્ત ચિન્તાકુલાયા
ગણ્ડન્યસ્તઃ કરકિસલયઃ કર્ણજાહેઽવતંસઃ ॥ ૨૬॥

પક્ષ્મસ્પન્દઃ સમજનિ સખે પશ્યતોર્માં યયોઃ પ્રાઙ્-
નિષ્પત્રાકૃન્મયિ તુ વિધિના તાદૃશે દૂરનીતે ।
અન્તર્બાષ્પચ્છુરણનિભૃતે સામ્પ્રતં તે મૃગાક્ષ્યા
નેત્રે ધત્તસ્તુહિનકણિકાદન્તુરામ્ભોજદૈન્યમ્ ॥ ૨૭॥

સાન્દ્રામોદં સપટુ સદયં સસ્મરં સાનુતર્ષં
સમ્ભોગાન્તે મુહુરપિ મયા સાદરં ચુમ્બિતો યઃ ।
નર્માલાપસ્મિતલવસુધાસેચનૈર્મુચ્યમાન-
સ્તામ્યત્યુષ્ણશ્વસિતપવનૈઃ સોઽતિ બિમ્બાધરોઽસ્યાઃ ॥ ૨૮॥

ક્રીડાશૈલૌ મદનનૃપતેઃ કાન્તિપૂરસ્ય કોકૌ
સ્યાતાં તસ્યા ધ્રુવમુરસિજૌ કિઞ્ચિદાપાણ્ડુમૂલૌ ।
મદ્વિશ્લેષઃ શરદુડુનિભાં ત્યાજયન્ હારમાલાં
મન્યે ભીતો વિતરતિ તયોરશ્રુધારાભિરન્યામ્ ॥ ૨૯॥

ભૂષાસ્વાસ્થાં યદપિ જહતી તાં વહત્યેવ કાઞ્ચીં
ગ્રાહં ગ્રાહં પૃથુ પૃથુ મયા મૌક્તિકં ગુમ્ભિતા યા ।
શ્રોણીબિમ્બે સુમહતિ તયા ભૂષિતે કોમલાઙ્ગ્યાઃ
સાલાવીતાં સ કિલ મદનો મન્યતે રાજધાનીમ્ ॥ ૩૦॥

મચ્ચિતાખ્યદ્વિપનિયમનાલાનયોર્દ્વન્દ્વમૂર્વોઃ
શ્રોણીભારાદલસમધુના જાયતે ખિન્નખિન્નમ્ ।
આરબ્ધાનાં હર હર મયા યત્ર સંવાહનાનાં

નિત્યં જાતા નિરવધિરસાઃ કેઽપિ કેઽપ્યન્તરાયાઃ ॥ ૩૧॥

આદ્વારાન્તં મદભિગમનાશઙ્કયા ચઞ્ચલાક્ષ્યા
યાતાયાતૈઃ કિસલયનિભૌ ક્લિશ્યતઃ પાદપદ્મૌ ।
મિથ્યાગોત્રસ્ખલનમસકૃત્ પ્રસ્તુતં હન્ત યાભ્યાં
લબ્ધું પાદપ્રણતિષુ મયા હન્ત સન્તાડનાનિ ॥ ૩૨॥

યદ્યપ્યસ્યાઃ કૃશયતિ વપુર્વલ્લરીં દીપ્યમાનો
વિશ્લેષાગ્નિર્દ્વિગુણયતિ તાં કિન્તુ લાવણ્યલક્ષ્મીમ્ ।
તપ્તાં તપ્તાં નયતિ નિતરાં તાનવં જાતવેદા
હૈમીં લેખામપિ તુ જનયત્યેવ વર્ણપ્રકર્ષમ્ ॥ ૩૩॥

પૃથ્વીરેણૂનલકનિકરે નેત્રયોર્બાષ્પપૂરં
હસ્તે ગણ્ડં સિતબિસલતાહારજાલં સ્તનાગ્રે ।
શ્રોણ્યાં ક્ષૌમં મલિનમસૃણં સા વહત્યેવ હન્તે-
ત્યાસ્તામેતદ્બહુવિલપિતૈર્માસ્તુ કાલાતિપાતઃ ॥ ૩૪॥

સ્થિત્વા ચૂતે પ્રથમકથિતે મુગ્ધકાન્તાધરાભં
દૃષ્ટ્વા સ્વૈરં કિસલયમથ પ્રેક્ષણીયા ત્વયા સા ।
પૃચ્છન્તી વા મલયપવનં પ્રશ્રયાન્મત્પ્રવૃત્તિં
મદ્વૃત્તાન્તં કથય કઠિનસ્યેતિ વા પ્રાર્થયન્તી ॥ ૩૫॥

છિન્તે તાપં હિમજલમયી ચાન્દની કિન્નુ ચર્ચા
મન્દસ્પન્દાઃ કિમુ સુખકરા મારુતાશ્ચામરાણામ્ ।
પૃચ્છન્તીનામિતિ સવયસાં સાતિરેકેઽપિ તાપે
સ્મિત્વા રમ્યં સકલમિતિ વા ચિત્તમાશ્વાસયન્તી ॥ ૩૬॥

પ્રસ્પન્દન્તે મલયપવના રુન્ધિ જાલં કવાટૈઃ
શમ્ભોર્નામ્ના શરગણમુચં ભીષયેઃ પઞ્ચબાણમ્ ।
જીવઞ્જીવં વિસૃજ ચરિતું ચન્દ્રિકે  ચન્દ્રિકાયા-
મિત્થં ચેટીં  સજલનયનામાદિશન્તી મુહુર્વા ॥ ૩૭॥

પ્રાપ્તાલમ્બા પરિજનકરૈઃ પ્રાપ્ય વા ચિત્રશાલાં
મુગ્ધા સ્વસ્યાશ્ચરણપતિતં વેતિ તં માં નિરીક્ષ્ય ।
એહ્યુત્તિષ્ઠ પ્રિય  ન કુપિતાસ્મીતિ બાષ્પાકુલાક્ષી
ગાઢાશ્લેષપ્રચલિતકરા રુધ્યમાના સખીભિઃ ॥ ૩૮॥

કોપં ચણ્ડિ  ત્યજ પરિજને દૈવમત્રાપરાદ્ધં
 યેનાકાણ્ડે સમઘટિ મહાનાવયોર્વિપ્રયોગઃ ।
ઇત્થં બદ્ધાઞ્જલિ કૃતરુષં ભાવિતામગ્રતસ્તાં
 સાહંભૂતા પ્રિયચટુશતૈરુદ્યતા વાનુનેતુમ્ ॥ ૩૯ ॥

ગણ્ડાલમ્બૈર્લુલિતમલકૈર્ધૂસરૈર્વક્ત્રબિમ્બં
 દૃષ્ટ્વા શુદ્ધસ્ફટિકઘટિતે બિમ્બિતં ભિત્તિભાગે ।
અન્તર્ગેહં જલદશકલૈરાવૃતો રોહિતાઙ્કઃ
 કેનાનીતઃ પુર ઇતિ ભિયા વ્યાહરન્તી સખીર્વા ॥ ૪૦ ॥

નિદ્રાં પ્રાપ્તા કથમપિ ચિરાત્તત્ર ચાલોકિની માં
 શૂન્યાશ્લેષં વિરચિતવતી હન્ત ઘાતાત્  કુચાગ્ર્યોઃ ।
નિર્ભિન્દાના નિજકરધૃતં કઙ્કણં સ્રસ્તશેષં
 પશ્યન્તીનાં નયનકમલે બધ્નતી વા સખીનામ્ ॥ ૪૧ ॥

વક્તિ ધ્વાઙ્ક્ષઃ સુહૃદુપગમં દક્ષિણે ક્ષીરવૃક્ષે
 વામં નેત્રં સ્ફુરતિ સુચિરાદુચ્છ્વસિત્યદ્ય ચેતઃ ।
કિઞ્ચ સ્વાનઃ શ્રવણમધુરો જાયતે કોકિલાનાં
 પ્રાણેષ્વાશામિતિ કથમપિ ભ્રાતરાબધ્નતી વા ॥ ૪૨ ॥

મુક્ત્વા જીવામ્યસુસમમિતિ વ્રીલિતા વિસ્મિતા વા
 તત્સઙ્ગાશા પુનરિહ પરં હેતુરિત્યાસિતા વા ।
શોચન્તી માં દયિતમથવા વિપ્રયોગાસહિષ્ણું
 સ્ત્રીણાં ચેષ્ટાસ્વિતિ હિ વિરહોત્થાસુ દિઙ્માત્રમેતત્ ॥ ૪૩ ॥

ગાઢાશ્લેષવ્યતિકરરસગ્રન્થનાદૂયમાનઃ
 સમ્ભોગાન્તે સ્વપનવિધયે યઃ પુરા ધૂયતે સ્મ ।
કણ્ઠોત્સઙ્ગાન્મમ સ વિધિના વૈરિણા દૂરકૃષ્ટો
 વામો બાહુસ્ત્વયિ સવિધગે યાસ્યતિ સ્પન્દમસ્યાઃ ॥ ૪૪ ॥

વક્તુર્વક્ત્રં તમસિ ભવતો નૈવ દૃશ્યેત રાત્રા-
 વામધ્યાહ્નં ભવતિ નિયમવ્યાકુલા વાસરે સા ।
સહ્યસ્પર્શે સતિ રવિકરે તામસહ્યસ્મરાર્તિં
 મત્સન્દેશં મણિવલભિકામાશ્રિતઃ શ્રાવયેથાઃ ॥ ૪૫ ॥

ત્યક્ત્વા ચૂતાનપિ કુસુમિતાનાગતો મત્સમીપં
 કિન્ન્વેષ સ્યાત્ કમપિ કુશલોદન્તમાખ્યાતુકામઃ ।

ઇત્યાલીભિર્ભૃતજલકણં પાણિનામૃષ્ટનેત્રં
    દૃષ્ટઃ સ્પષ્ટાક્ષરમિતિ શનૈઃ શંસિતું પ્રક્રમેથાઃ ॥ ૪૬॥

અમ્લાના તે જયતિ કમનીયાઙ્ગિ મઙ્ગલ્યભૂષા
    પત્યુઃ પાર્શ્વાત્ સુહૃદહમુપેતોઽસ્મિ સન્દેશહારઃ ।
જાતં વિદ્ધિ શ્રુતિસુખગિરાં કોકિલાનાં કુલે માં
    યે પઞ્ચેષોઃ કિમપિ પથિકાકર્ષણં ષષ્ઠમસ્ત્રમ્ ॥ ૪૭॥

ચોલેષ્વાસ્તે સુમુખિ  કુશલી ત્વત્પ્રિયઃ પૃચ્છતિ ત્વાં
    કચ્ચિત્ ક્ષેમં ભજતિ ભવતીત્યાત્તવાચં ભવન્તમ્ ।
ભૂયોભૂયઃ કથય કથયેત્યાલપન્ત્યશ્રુમિશ્રૈઃ
    પ્રીતિસ્મેરૈર્મદિરનયના માનયિષ્યત્યપાઙ્ગૈઃ ॥ ૪૮॥

એવં બ્રૂયાઃ પુનરજનિ યઃ પ્રેમકોપે મિથો વાં
    જાતે મૌને ચપલચપલસ્તત્ક્ષણં પૂર્વમુક્ત્યામ્ ।
તાદૃક્પ્રેમ્ણશ્ચિરવિરહિણઃ પ્રાણનાથસ્ય વાણી
    સેયં મત્તઃ શ્રવણસરસા શ્રૂયતાં શ્રાવ્યબન્ધા ॥ ૪૯॥

કલ્યાણાઙ્ગિ  પ્રિયસહચરીં ત્વામનાસાદયદ્ભિ-
    ર્બાહ્યૈરક્ષૈઃ સહ પરમહં યામિ કામપ્યવસ્થામ્ ।
ધન્યં ચેતઃ પુનરિદમહોરાત્રમન્યાનપેક્ષં
    ત્વય્યામગ્નં બત નનુ પૃથગ્ભાગ્યમપ્યેકજાનામ્ ॥ ૫૦॥

માદ્યદ્ભૃઙ્ગૈઃ કુમુદપવનૈસ્તર્જ્યમાનસ્ય ઘોરૈ-
    રાતઙ્કાખ્યે સરસિ લુઠતો હા નિશીથે નિશીથે ।
નિદ્રામૂકે જગતિ રુદતિ શ્વાસચિન્તાજુષો મે
    સઙ્ક્રન્દન્તશ્ચટુલનયને ચક્રવાકાઃ સહાયાઃ ॥ ૫૧॥

મોહાદ્વૈતં વિહરતિ ધૃતિર્લીયતે જાડ્યમીને
    ભાત્યુન્માદો ભ્રમતિ મતિરિત્યાદિ સોઽહં ન વેદ્મિ ।
બાણં મુઞ્ચન્ પરિસરચરો ન સ્વપન્ નાપિ ખાદન્
    કૃત્સ્નં જાનાત્યલસગમને કેવલં પઞ્ચબાણઃ ॥ ૫૨॥

કાલે ચાસ્મિન્ કનદલિભૃતઃ કમ્પિતાગ્રપ્રવાલાઃ
    કમ્રા વલ્લ્યઃ કિમપિ મરુતા ચુમ્બિતા દક્ષિણેન ।
કિઞ્ચિદ્દષ્ટાધરકિસલયાં પ્રાઝ્મયા ભોગકાલે
    સીત્કુર્વાણાં ધુતકરતલાં ત્વાં પ્રિયે  સ્મારયન્તિ ॥ ૫૩॥

અંસાલમ્બિશ્લથકચભરં હસ્તરુદ્ધામ્બરાન્તં
 પ્રાક્ક્રીડાન્તે તવ મણિગવાક્ષોપકણ્ઠેષુ ચારમ્ ।
સ્મારં સ્મારં કથમપિ મયા મુહ્યતા સહ્યતેऽસૌ
 મન્દો વાયુઃ સુતનુ બકુલોદ્ભેદસૌરભ્યબન્ધુઃ ॥ ૫૪॥

તીર્ત્વા રાત્રિં વિરહમહતીં તીવ્રતાપાં કથઞ્ચિ-
 દ્દૃષ્ટ્વા ભાનોઃ કિરણમરુણં જમ્ભશત્રોર્દિગન્તે ।
પ્રત્યુદ્યાન્તીં ત્વરિતમબલાં શ્લિષ્યતે ભાગ્યસીમ્ને
 સારઙ્ગાક્ષિ સ્પૃહયતિ મનો હન્ત ચક્રાખ્યયૂને ॥ ૫૫॥

ઉત્કણ્ઠોऽસ્મિ ત્વદુદિતધિયા મુગ્ધહંસીનિનાદે
 ત્વદ્ભૂષાયાં હરિતિ સતતં લોચને પાતયામિ ।
ત્વત્સંસ્પૃષ્ટે મમ ચ વપુષિ પ્રેમ બધ્નામિ કાન્તે
 સત્યં પ્રાણાનપિ પરમહં ત્વત્પ્રિયાન્ ધારયામિ ॥ ૫૬॥

ત્વં ચાહં ચ ક્ષિતિમુપગતાવિત્યવિશ્લેષચિન્તા
 નિન્દાવન્તૌ સ્મર ઇતિ મિથો વાક્યસમ્ભેદસૌખ્યમ્ ।
સ્પૃશ્યેતે નૌ નિશિ શશિકરૈરઙ્ગકે યૌગપદ્યાત્
 તેનાપ્યસ્તિ દ્વિરદગમને સત્યમાશ્લેષબુદ્ધિઃ ॥ ૫૭॥

હાહન્તાસ્મિન્નસુલભમિથોદર્શને વિપ્રયોગે
 સૈવાલમ્બો મમ ભગવતી ભાવનાકલ્પવલ્લી ।
ત્વામાસીનામસકૃદનયા ગાઢમાલિઙ્ગ્ય રાગા-
 દઙ્કારૂઢામલઘુજઘને નોચિતં વક્તુમન્યત્ ॥ ૫૮॥

જાતં ચેતો મદનસુભટસ્યાદ્ય યોગ્યં શરવ્યં
 નૈકચ્છિદ્રં નિયતમમુતઃ સુભ્રુ વિભ્રંશિ ધૈર્યમ્ ।
કાલાત્ ક્ષીણે પુનરવયવે વર્ધતે કેવલં નો
 તાપસ્તીવ્રસ્મરહુતભુજા તસ્ય વર્ણોદ્ગમોऽપિ ॥ ૫૯॥

એવંપ્રાયા ન હિ ન વિરહે જીવિતું સન્ત્યુપાયાઃ
 સત્યં તૈસ્તૈઃ કૃતધૃતિરહં પ્રાણિમિ પ્રાણનાથે ।
નિશ્ચિત્યૈવં નિરુપમગુણે સાહસેભ્યો નિવૃત્તા
 ત્વં ચ સ્નાનાદિષુ સવયસાં પ્રાર્થનાં મા નિષેધીઃ ॥ ૬૦॥

તીર્ણપ્રાયો વિરહજલધિઃ શૈલકન્યાપ્રસાદા-

ચ્છેષં માસદ્વિતયમબલે સહ્યતાં મા વિષીદ ।
ધૂપોદ્ગારૈઃ સુરભિષુ તતો ભીરુ સૌધાન્તરેષુ
ક્રીડિષ્યાવો નવજલધરધ્વાનમન્દ્રાણ્યહાનિ ॥ ૬૧॥

કચ્ચિચ્ચિત્તે સ્ફુરતિ ચપલાપાઙ્ગિ ચૂર્ણ્યાં કદાચિત્
સ્રસ્તોત્તંસં ધવલનયનં ધૌતબિમ્બાધરોષ્ઠમ્ ।
સ્નાનાન્તે તે મુખમુપસખિ પ્રેક્ષમાણે મયિ દ્રા-
ગ્વક્ષોદઘ્ને પયસિ પુનરપ્યાવયોર્મજ્જનં તત્ ॥ ૬૨॥

આશ્લિષ્યન્તં વિટપભુજયા તત્ર વલ્લીરનેકાઃ
ક્રીડારામે કમપિ તરુણં વીક્ષ્ય માકન્દવૃક્ષમ્ ।
સાચીકૃત્ય સ્ફુરદધરયા ચણ્ડિ વક્ત્રં ભવત્યા
સુભ્રૂભઙ્ગઃ સજલકણિકઃ પ્રેષિતો મય્યપાઙ્ગઃ ॥ ૬૩॥

પ્રત્યાખ્યાતઃ પ્રણયિનિ રુષા બિમ્બિતોઽહં સ્તને તે
સૈરન્ધ્ર્યજ્ઞા સ્થગયિતુમભૂચ્ચન્દનેન પ્રવૃત્તા ।
મા પાટીરં પુલકિનિ પુનશ્ચાત્ર લિમ્પેતિ શંસ-
ત્યાલીવૃન્દે સ્મિતજુષિ કૃતા દૃક્ત્વયા વ્રીલગર્ભા ॥ ૬૪॥

ઉચ્ચિન્વત્યાઃ કિસલયરુચા પાણિનોદ્યાનપુષ્પં
સાકં ભૃઙ્ગૈસ્તવ મયિ મુખામ્ભોજસૌરભ્યલુબ્ધે ।
રેણુત્રસ્તા ઇવ સુમનસાં દક્ષિણાઃ કેલિસખ્યઃ
કઞ્ચિત્કાલં કરકિસલયૈરપ્યધુર્લોચનાનિ ॥ ૬૫॥

ઇત્યેતસ્માન્મમ કુશલિતાં વિદ્ધ્યભિજ્ઞાનદાના-
દ્ભૂયશ્ચૈકં શ‍ૃણુ સહચરીં ધૂતનૈકાનુનીતિમ્ ।
કેલીહંસે સ્મરજુષિ હઠાચ્ચુમ્બતીષત્સ્તનન્તીં
ત્વં તુ સ્મૃત્વા કિમપિ બહલવ્રીલમાલોકથા મામ્ ॥ ૬૬॥

રાગો નામ ત્રુટતિ વિરહેણેતિ લોકપ્રવાદ-
સ્ત્વત્સમ્બદ્ધો મમ શતગુણઃ સઙ્ગમાદ્વિપ્રયોગે ।
સોઽયં ભેદો વિષયભિદયા સઙ્ગમે ત્વં કિલૈકા
વિશ્લેષે તુ ત્રિભુવનમિદં જાયતે ત્વન્મયં હિ ॥ ૬૭॥

એતત્કૃત્યં પ્રિયસખ મમ ભ્રાતુરાર્તસ્ય કૃત્વા
નાસીરઃ સ્યા જગતિ કરુણાશાલિનાં સંવિભાગે ।
શંસન્તિ ત્વાં નનુ પરભૃતં શૈશવે યદ્ભૃતોઽન્યૈઃ

પત્રિવ્રાતાભરણ  ભરણેનાધિ સ ત્વં પરેષામ્ ॥ ૬૮॥

એવં તસ્યા વિરહવિધુરં જીવિતં સ્થાપયિત્વા
ગચ્છ સ્વેચ્છાવિહરણ  યથાપ્રાર્થિતં દિગ્વિભાગમ્ ।
માન્યશ્રીઃ સ્યાન્મદનનૃપતેઃ કોકિલા તેઽનુકૂલા
ભૂયાન્મૈવં સકૃદપિ તયા વિપ્રયોગપ્રસઙ્ગઃ ॥ ૬૯॥

Contact Venetia Ansell
www.rasalabooks.com  venetia at rasalabooks.com

*Uddanda Shastri's Kokila Sandesha*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*